# Navagraha Suktam in Hindi – नवग्रह सूक्तम्

ओं शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनम् ध्यायेत्सर्व विघ्नोपशान्तये ॥

ओं भूः ओं भुवः ओगं सुवः ओं महः ओं जनः ओं तपः ओगं सत्यम् ओं
तत्सवितुर्वरे□ऽण्यं भर्गोदेवस्यं धीमहि धियो यो नः प्रचोदया□ऽत् ॥
ओं आपो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम् ॥

ममोपात्त-समस्त-दुरितक्षयद्वारा श्रीपरमेश्वर प्रीत्यर्थं आदित्यादि
नवग्रह देवता
प्रसाद सिध्यर्तं आदित्यादि नवग्रह नमस्कारान् करिष्ये ॥

ओं आसत्येन रजंसा वर्तमानो निवेशयंन्नमृतं मर्त्यंञ्च ।
हिरण्ययेन सविता रथेनाऽऽदेवो यातिभुवंना विपश्यन् ॥
अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् ।
अस्य यज्ञस्यं सुक्रतुम्□ ॥
येषामीशे पशुपतिः पशूनां चतुष्पदामुत चं द्विपदा□म् ।
निष्क्रीतोऽयं यज्ञियं भागमेतु रायस्पोषा यजमानस्य सन्तु ॥
ओं अधिदेवता प्रत्यधिदेवता सहिताय आदित्याय नमः ॥ १ ॥

Panotbook.com

ओं आप्यायस्व समेतु ते विश्वतस्सोम वृष्णियम् ।
भवा वाजस्य सङ्गथे ॥
अप्सुमे सोमो अब्रवीदन्तर्विश्वानि भेषजा ।
अग्निञ्च विश्वशम्भुवमापश्च विश्वभेषजीः ॥
गौरी मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी ।
अष्टापदी नवपदी बभूवुषी
सहस्राक्षरा परमे व्योमन् ॥
ओं अधिदेवता प्रत्यधिदेवता सहिताय सोमाय नमः ॥ २ ॥

ओं अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् ।
अपाग्ंरेताग्ंसि जिन्वति ॥
स्योना पृथिवि भवाऽनृक्षरा निवेशनी ।
यच्छानश्शर्म सप्रथाः ॥
क्षेत्रस्य पतिना वयग्ंहिते नेव जयामसि ।
गामश्वं पोषयित्न्वा स नो मृडातीदृशे ॥
ओं अधिदेवता प्रत्यधिदेवता सहिताय अङ्गारकाय नमः ॥ ३ ॥

ओं उद्बुध्यस्वाग्ने प्रतिजागृह्येनमिष्टापूर्ते सग्ंसृजेथामयञ्च ।
पुनः कृण्वग्ग्स्त्वा पितरं युवानमन्वाताग्ंसीत्त्वयि तन्तुमेतम् ॥
इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ।

Panotbook.com

समूंढमस्यपागं सुरे ॥
विष्णो ररराटमसि विष्णोः पृष्ठमसि विष्णोश्श्नप्त्रेस्थो
विष्णोस्स्यूरसि विष्णोर्ध्रुवमसि वैष्णवमसि विष्णवे त्वा ॥
ओं अधिदेवता प्रत्यधिदेवता सहिताय बुधाय नमः ॥ ४ ॥

ओं बृहस्पते अतियदर्यो अर्हाद्दद्युमद्विभाति क्रतुमज्जनेषु ।
यद्दीदयच्चवसर्तप्रजात तदस्मासु द्रविणन्धेहि चित्रम् ॥
इन्द्रमरुत्व इह पाहि सोमं यथा शार्याते अपिबस्सुतस्य ।
तव प्रणीती तव शूरशर्मन्नाविवासन्ति कवयस्सुयज्ञाः ॥
ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतस्सुरुचो वेन आवः ।
सबुध्नियां उपमा अस्य विष्ठास्सतश्च योनिमसतश्च विवः ॥
ओं अधिदेवता प्रत्यधिदेवता सहिताय बृहस्पतये नमः ॥ ५ ॥

ओं प्रवश्शुक्राय भानवे भरध्वम् ।
हव्यं मतिं चाग्नये सुपूतम् ।
यो दैव्यानि मानुषा जनूंग्ंषि अन्तर्विश्वानि विद्म ना जिगाति ॥
इन्द्राणीमासु नारिषु सुपत्नीमहमश्रवम् ।
न ह्यस्या अपरञ्चन जरसा मरते पतिः ॥
इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः । अस्माकमस्तु केवलः ॥
ओं अधिदेवता प्रत्यधिदेवता सहिताय शुक्राय नमः ॥ ६ ॥

Panotbook.com

ओं शन्नो देवीरभिष्टय आपो भवन्तु पीतये ।
शम्योरभिस्रवन्तु नः ॥
प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयग्ग्स्याम पतयो रयीणाम् ॥
इमं यमप्रस्तरमाहि सीदाऽङ्गिरोभिः पितृभिस्संविदानः ।
आत्वा मन्त्राः कविशस्ता वहन्त्वेना राजन् हविषा मादयस्व ॥
ओं अधिदेवता प्रत्यधिदेवता सहिताय शनैश्चराय नमः ॥ ७ ॥

ओं कया नश्चित्र आभुवदूती सदावृधस्सखा ।
कया शचिष्ठया वृता ॥
आऽयङ्गौः पृश्निरक्रमीदसनन्मातरं पुनः ।
पितरञ्च प्रयन्त्सुवः ॥
यत्ते देवी निर्ऋतिराबबन्ध दाम ग्रीवास्वविचर्त्यम् ।
इदन्ते तद्विष्याम्यायुषो न मध्यादथाजीवः पितुमद्धि प्रमुक्तः ॥
ओं अधिदेवता प्रत्यधिदेवता सहिताय राहवे नमः ॥ ८ ॥

ओं केतुङ्कृण्वन्नकेतवे पेशो मर्या अपेशसे ।
समुषद्भिरजायथाः ॥
ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् ।
श्येनोगृध्राणागस्वधितिर्वनानागं सोमः पवित्रमत्येति रेभन् ॥

Panotbook.com

सचित्र चित्रं चितयन्तमस्मे चित्रक्षत्र चित्रतमं वयोधाम् ।
चन्द्रं रयिं पुरुवीरम् बृहन्तं चन्द्रचन्द्राभिर्गृणते युवस्व ॥
ओं अधिदेवता प्रत्यधिदेवता सहितेभ्यः केतुभ्यो नमः ॥ ९ ॥

॥ ओं आदित्यादि नवग्रह देवताभ्यो नमो नमः ॥

॥ ओं शान्तिः शान्तिः शान्तिः ॥

Panotbook.com